Lokadarpana
Vol. VI, No. 1, 70-82, April, 2026
Pandit Shree Lokanath Luitel Smriti Pratishthan, Dharan

# संस्कृतकाव्यशिक्षणेऽवलम्बनीयाः कार्यकलापाः

**डा. महानन्दतिमिल्सिना***
timsinamahananda@gmail.com
Received Date: February 14, 2026 - Accepted Date: March 28, 2026

**लेखसारः**

पाठ्यक्रमस्योद्देश्यप्राप्तये पाठ्यविषयानुसारेण प्रस्तुताः शिक्षणविधि-शिक्षणप्रक्रिया-शिक्षणक्रम-शैक्षिकसामग्रीप्रयोगादीनां विस्तृताः सूचना एव शिक्षणकार्यकलापाः। सुव्यवस्थितकार्यकलापमाध्यमेन विहितं संस्कृतकाव्यशिक्षणं प्रभावान्वितं सफलञ्च जायते। संस्कृतकाव्येषु खण्डकाव्य-महाकाव्य-गद्यकाव्यादीनि वर्तन्ते। एतानि काव्यानि मुख्यतो निगमनागमन-प्रदर्शन-व्याख्या-विश्लेषणादिविधिना बोधयितुं सौकर्यं जायते। संस्कृतकाव्ये रस-ध्वनि-गुणालङ्कारादीनां तत्त्वानां स्थितिः कीदृशी वर्तत इति विचार्यते। काव्यशास्त्रिप्रतिपादितानां काव्यतत्त्वसम्बद्धानां विषयाणां लक्षणं काव्ये कियद् घटत इति निभाल्यते। श्लोकव्याख्यानस्य पारम्परिकी पद्धतिर्वर्तमानसन्दर्भे परिष्करणीया वर्तते। श्रव्य-दृश्यशिक्षणसामग्रीणां माध्यमेन विद्यार्थिनः शिक्षणीया भवन्ति। विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं विधातव्यं भवति। विद्यार्थिनां शिक्षणोपलब्धिसुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयोरवाप्तिरावश्यकी। एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्याभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम्। पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन् न वेति विचारणीयाः। शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम्। तत्र शिक्षणोपलब्धिः क्रमश औपचारिकरूपेणानौपचारिकरूपेण च परिमापनीया। शिक्षणसिद्धान्तानुसारेण सं

* सहप्राध्यापकः, साहित्यम्, नेपालसंस्कृतविश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः।

स्कृतकाव्यसम्बद्धपाठ्यक्रमस्योद्देश्यमधिगत्य दैनिकपाठयोजनां च निर्माय काव्यशिक्षणं विधातव्यमिति प्रतिपादनमस्य लेखस्योद्देश्यं प्रतिपाद्यविषयो वा विद्यते। गुणात्मिकायामनुसन्धानपद्धत्यामाधारितेऽस्मिन्ननुसन्धाने द्वितीयकस्रोतोयुतानां सामग्रीणां संयोजनं कृतमस्ति।

**शब्दकुञ्जी :** पाठयोजना, मूल्याङ्कनम्, शिक्षणसिद्धान्तः, संस्कृतकाव्यम्।

## विषयपरिचयः

संस्कृतकाव्यशिक्षणे प्रयुज्यमाना उपाया एव काव्यशिक्षणस्य सिद्धान्ताः। केन प्रकारेण शिक्षणे प्रभावाधिक्यमानीयते, शिक्षणक्रमे किं किं विचार्यत इत्यादिका विषयाः काव्यशिक्षणसिद्धान्ते व्याख्यानं विधीयते। काव्यशिक्षणे शिक्षकेषु चातुर्यमपेक्ष्यते। प्रशिक्षितः शिक्षक एव कुशलतया पाठ्यक्रमस्यापेक्षानुरूपं काव्यं शिक्षयति। विविधानां शिक्षणसामग्रीणां साहाय्येन विद्यार्थिनां रुच्यनुकूलं शिक्षणमपेक्षते। शिक्षणे पाठयोजनाया आवश्यकताऽपि दरीदृश्यते। पाठयोजनानुकूलं विहितं शिक्षणमेव प्रभावान्वितं जायते।

संस्कृतसाहित्यशिक्षणे शिक्षकैर्वार्षिकीं दैनिकीं वा पाठयोजनां निर्माय शिक्षणसहजीकरणं कर्तव्यम्। पाठ्यविषयान्तर्गतानां विविधपक्षाणां प्रश्नोत्तरलेखनशिल्पविकासाय शिक्षकाः प्रेरणाप्रदा भवेयुः। कक्षायां विषयानुसारेण प्रश्नोत्तर-लेखन-विमर्श-तात्पर्यस्फुटीकरणादिकार्येषु शिक्षकैः प्रेरकैर्भवितव्यम्। पाठ्यविषयाणां पाठ्यवस्तूनां वा प्रकृत्यनुसारेण चिन्तन-मनन-प्रश्नोत्तरलेखनादिकार्येषु शिक्षकैरेवच्छात्राः प्रेरणीयाः। गद्यपद्यात्मककृतीनां देशकालगुणदोष-निरूपणपूर्वकं समीक्षाकार्ये, कृतिकाराणां देशकालकृत्यात्मकपरिचयप्रदाने च शिक्षकैरेवच्छात्राणां सामर्थ्यमुत्पादनीयम्। नाटकानां लक्षणग्रन्थानाञ्च विशिष्टशब्दप्रयोगं विधाय तेषां लाक्षणिकविषयवस्तुबोधे समन्वये च सोदाहरणं छात्राः प्रशिक्षणीयाः। शिक्षकैः शिक्षणकार्ये यथाविषयं यथावसरञ्च गद्यपद्यात्मककाव्येषु दण्डान्वय-खण्डान्वय- व्युत्पत्तिप्रयोगाऽऽगमन-निगमन-तुलनोदाहरण-कोशाऽनुवादप्रभृतयो विविधाः शिक्षणविधयोऽवलम्बनीयाः। गद्यकाव्य-पद्यकाव्य-रूपक-लक्षणशास्त्राणां शिक्षणे शिक्षकैः प्रस्तावनारूपेण विषयवस्तूनां सामान्यपरिचयमुद्देश्यकथनं प्रस्तुतिविधिञ्च बोधयित्वा विद्यार्थिभ्यस्तत्सम्बद्धं कक्षाकार्यं गृहकार्यञ्च प्रदेयम्।

संस्कृतकाव्यशिक्षणे कीदृशा विधयः प्रचलिताः, कीदृशाः सिद्धान्ताः कार्यकलापाश्चावलम्बनीया इति विषया लेखेऽस्मिन् समस्यारूपेण समागताः सन्ति। एवमेव संस्कृतकाव्यशिक्षणे प्रचलितानां विधीनां सिद्धान्तानाञ्च समीक्षणम्, संस्कृतकाव्यशिक्षणेऽवलम्बनीयानां कार्यकलापानां विवेचनञ्चाध्ययनस्योद्देश्यं विद्यते। मुख्यतोऽत्र खण्डकाव्य-महाकाव्यादीनां शिक्षणेऽवलम्बनीयाः कार्यकलापाः समाविष्टाः सन्ति। अत्र वैदिकसाहित्यशिक्षणस्य विषया नैव संयोजिताः। संस्कृतकाव्यशिक्षणविधौ कार्यकलापेषु च लेखस्य केन्द्रीकरणमेवास्य लेखस्य सीमा विद्यते।

संस्कृतकाव्यशिक्षणेऽवलम्बनीयाः कार्यकलापा इति शीर्षके विस्तृतमध्ययनं नैव प्राप्यते। कतिपयैराचार्यैर्विषयेऽस्मिन् सामान्यरूपेणानुसन्धानं कृतं संलक्ष्यते। काव्यशिक्षणविषयसम्बद्धानि कानिचन पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयन्ते -

कालीशङ्करमिश्रः 'संस्कृत का शिक्षणशास्त्र' (संस्कृतस्य शिक्षणशास्त्रम्, ई.२०१७) इति पुस्तकस्य

*संस्कृत भाषा तथा संस्कृत साहित्य का विभिन्न विधाओं का शिक्षण* (संस्कृतभाषायाः संस्कृतसाहित्यस्य च विविधविधानां शिक्षणम्) इति शीर्षके शिक्षणविधिविषये प्रकाशयति - पद्यकाव्यशिक्षणे परम्परागतविधिः, दण्डान्वयविधिः, खण्डान्वयविधिः, गीतनाट्यविधिः, व्याख्याविधिः, आधुनिकविधिश्च प्रयुज्यते। परम्परागतविधेर्द्वितीयं नाम भाषानुवादविधिर्वर्तते। अत्राध्यापकः स्वयमादर्शवाचनं करोति, स पदविभागान्वयादीन् प्रदर्श्य छात्रान् बोधयति। दण्डान्वयविधौ प्रथमं विशेषणमन्विष्यते, तदनु विशेष्येण सह संयोजनं विधीयते। ततः क्त्वा-णमुल्-ल्यप्प्रभृतीनां प्रत्ययानामन्वेषणं क्रियते। उक्तञ्च -

आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम्।
क्त्वाणमुल्ल्यप्प्रभृत्येवं पूर्वं दण्डान्वये भवेत्।। (मिश्रः, पृ.१२६)

एवमेव खण्डान्वयविधौ कः, कम्, केन, कस्मै चेत्यादिभिः पदैः प्रश्नः पृच्छ्यते। एवमेव कीदृशः, किम्भूतः, कथम्भूतः, कथं, कदा, कुत्र, कुतश्चेत्यादिपदैः प्रश्नो विधीयते। उक्तञ्च -

कर्तृकर्मक्रियास्तावत् श्लोके योज्यास्ततः परम्
किमो रूपं पुरस्कृत्य तृतीयादिनियोजयेत्।
ल्यवन्तञ्च तुमन्तञ्च क्त्वान्तं कर्मविभूषितम्
खण्डान्वये पुनः प्रश्नपूर्वमन्ते प्रयोजयेत्।। (मिश्रः, पृ.१२७)

एवमेव व्याख्याविधौ पदविभागोऽन्वय-क्रियापदज्ञान-लिङ्ग-वचन-व्युत्पत्तिज्ञानानां चर्चा कृता वर्तते। व्याख्यानस्य लक्षणमित्थं प्रोक्तमस्ति -

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।
आक्षेपोऽथ समाधानं व्याख्यानं पञ्चधा स्मृतम्।। (मिश्रः, पृ.१२५)।

रञ्जनाकुमारी Teaching of Sanskrit (संस्कृतशिक्षणम्, ई. २०१७) पुस्तकस्य पद्य शिक्षण की विधियाँ (पद्यशिक्षणविधयः) इति शीर्षके संस्कृतपद्यकाव्यानां शिक्षणविधिविषये विवेचनं विदधाति। अस्या विचारानुसारेण पद्यशिक्षणे भाषानुवादविधिः, व्याख्याविधिः, दण्डान्वयविधिः, खण्डान्वयविधिः, समीक्षाविधिः, तुलनाविधिः, व्यासविधिश्चोपयुज्यते। पद्यकाव्यशिक्षणस्य सोपाने प्रस्तावनोद्देश्यकथन-प्रस्तुतीकरण-पुनरावृत्ति-कक्षाकार्य-गृहकार्याणि च विधातव्यानि (पृ.१९६)।

नेपालसंस्कृतविश्वविद्यालयस्य शास्त्रिकक्षाया तृतीयखण्डस्य साहित्यविषयके पाठ्यक्रमे (२०८१) शिक्षणविधीनांशैक्षिकसामग्रीणाञ्चविषयेप्रस्तुतंयत्-व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्याः शिक्षणविधयो यथाप्रकरणं प्रतिपाद्यविषयानुरूपमत्र प्रयोक्तुं शक्यन्ते। यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयाः। समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषयानुरूपं प्रयोगो विधेयः अत्यावश्यकतायां जातायामन्तर्जालादिमाध्यमेनाप्यध्ययनाध्यापनं कर्तुं शक्यते। तदर्थं सङ्गणकयन्त्राणि प्रयोज्यानि। तद्व्यवस्थापनं सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेयम्। आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया। गृहकार्यम्, कक्षापरीक्षा,

परियोजनकार्यमित्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुं शक्नुवन्तीति।


उपर्युक्तैः पूर्वकार्यैर्ज्ञायते यत् संस्कृतकाव्यशिक्षणे के के विधयोऽवलम्बनीयाः ? काव्यशिक्षणसिद्धान्ताः के के सन्तीति सन्दर्भे विशेषेण विवेचनं नैव सम्प्राप्यते। एष एवात्र शोधान्तरालो वर्तते, अतः शोधान्तरालमिमं पूरयितुमनुसन्धानमेतत् सान्दर्भिकमौचित्यपूर्णं च संलक्ष्यते।

## अध्ययनविधिः

संस्कृतकाव्यशिक्षणेऽवलम्बनीयाः कार्यकलापा इति शीर्षकान्वितमध्ययनमेतद् गुणात्मिकायामनुसन्धान- पद्धत्यामाधारितं वर्तते। अत्र पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते। अत्र संस्कृतकाव्यशास्त्रिभिर्विरचिता शिक्षणविधि-सिद्धान्तसम्बद्धा ग्रन्थाः सामग्रीरूपेण संयोजिताः सन्ति। काव्यशिक्षणविषये लिखितानां पुस्तकानां विचाराणां लेखानाञ्चात्र सङ्कलनं विधाय विश्लेषणं विहितं वर्तते। सङ्कलितानां सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेरुपयोगः कृतोऽस्ति।

### संस्कृतकाव्यशिक्षणस्य कार्यकलापाः

संस्कृतसाहित्यस्य सुदीर्घतमा परम्परा वर्तते। साहित्यमेतद् वैदिक-लौकिकत्वेन भेदद्वयान्वितमस्ति। तत्र वैदिकसाहित्ये ऋग्वेद-यजुर्वेद-सामवेदाथर्ववेदाश्च विद्यन्ते, एते मन्त्रभागा अपि कथ्यन्ते। एवञ्च व्याख्याग्रन्थेषु ब्राह्मणग्रन्थाः, आरण्यकग्रन्था उपनिषदश्च विद्यन्ते। तथैव लौकिकसाहित्येषु दृश्यकाव्यश्रव्यकाव्यत्वेन भेदद्वयं स्वीक्रियते। दृश्यकाव्यस्यापि रूपकोपरूपाकादिबहुभेदाः सन्ति। श्रव्यकाव्यस्य गद्यपद्यचम्पूरूपेण भेदत्रयं संलक्ष्यते। गद्यकाव्यस्यापि कथाख्यायिकारूपेण भेदद्वयमुररीकृतमस्ति। एवञ्च पद्यकाव्यस्य महाकाव्यखण्डकाव्यत्वेन भेदद्वयं स्वीक्रियते।



संस्कृतकाव्यशिक्षणे विविधाः कार्यकलापा अवलम्बनीया भवन्ति। प्रथमं विद्यार्थिभ्यः शुद्धाशुद्धगद्यपद्ययोर्वाचनं संश्राव्य शुद्धोच्चारणं निश्चेतुं विद्यार्थिभ्यो निर्देशनं दातव्यम्। खण्डकाव्यस्य महाकाव्यस्य वा पद्यमुच्चार्य तस्य गण-लय-गति-यतिविषये प्रतिक्रियाप्रकटनाय विद्यार्थिभ्यः प्रेरणा दातव्या। काव्य-काव्यशास्त्रसम्बद्धानां पद्यानामादर्शवाचनं संश्राव्य तदनुरूपं तेषां कण्ठस्थीकरणायोत्साहप्रदानं विधातव्यम्। तथैव रूपक-संवाद-गद्य-पद्यविश्लेषणादिविषयान् श्रावयित्वा प्रतिक्रियाभिव्यक्तये विद्यार्थिनः प्रेरणीयाः। गद्यपद्ययोः प्रेरकमंशं संश्राव्य तस्य पुनरावृत्तयेऽप्युत्प्रेरणं कर्तव्यम्। गद्यपद्यरूपकाणां विस्तृतघटनां निरूप्य तेषां मुख्यमुख्यघटनानामभिव्यक्त्यै विद्यार्थिनो निर्देशनीयाः। यदा कदा कक्षायां काव्यगोष्ठी सञ्चालनीया। प्रकोष्ठे किमपि पद्यं संश्राव्य तत्र गुण-दोषालङ्कार-रस-भावादिकाव्यतत्त्वकथनाय समुत्प्रेरणीयं भवति। एवमेव गद्यांशं संश्राव्य तस्य मुक्तकादिगद्यप्रकारकथनायोत्प्रेरणा दातव्या। सामूहिकरूपेण गद्यपद्यानामुच्चारणायापि निर्देशनीयम्। शिक्षकमनुसृत्य गणयतिगतिलयानुरूपं रूपकमहाकाव्यगतपद्यानां वाचनं कर्तुं विद्यार्थिनां प्रेरणा प्रदेया। पाठितानां गद्यपद्यरूपकगतघटनानां वर्णनाय निर्देशनीयम्। एवञ्च साभिनयं रूपकसंवादं प्रस्तोतुं प्रेरणीयं भवति। श्लोकस्यान्वय-पर्याय-समासालङ्कारच्छन्दोनामकथनाय निर्देशनं दातव्यम्। निर्दिष्टमहाकाव्य-गद्यकाव्यवैशिष्ट्यवर्णनायापि विद्यार्थिनो निर्देशनीया भवन्ति। काव्यपरिभाषा-काव्यभेद-ध्वनिभेद-रसप्रकार-दोषरीतिगुणालङ्गारप्रकारकथनाय च छात्रा आज्ञापनीयाः। तथैव छन्दोलक्षणोदाहरणानां सस्वरपठनाय निर्देशनं दातव्यम्। एवञ्च गण-लय-यति-गतिनियमपालनपूर्वकं रूपक-महाकाव्यगतपद्यानां पठनाय विद्यार्थिनः प्रेरणीया भवन्ति। एवमेव तारमधुरस्वरेण गद्यपद्यानां पठनाय, मन्दगत्या द्रुतगत्या च गद्यांशानां वाचनाय, काव्यशास्त्रीयकारिकोदाहरणपद्यानां पठनाय, निर्दिष्टपाठानामादर्शवाचनाय च विद्यार्थिनः प्रेरणीयाः। तथैव छन्दोलक्षणोदाहरणानां शुद्धलेखनाय, पद्यमुक्त्वा तस्य छन्दोनामोल्लेखनपुरस्सरं गणयतिव्यवस्थालेखनाय, रूपक-महाकाव्यगतपद्यानां शुद्धलेखनाय, निर्दिष्टपद्यानां पृथक् पृथक् प्रसङ्गान्वय-पर्याय-कोश-समासालङ्कारादिलेखनाय तेषां व्याख्यानाय चोत्प्रेरणा प्रदेया। (माध्यमिक शिक्षा पाठ्यक्रम, २०७६)

## काव्यशिक्षणेऽवलम्बनीया विषयाः

संस्कृतकाव्यशिक्षणं प्रभावकारिरूपेण रुचिपूर्णतया विधातव्यम्। अस्य कृते निम्नाङ्कितेषु विषयेषु विचारो विधेयः -

### पाठयोजनां निर्माय शिक्षणम्

विद्यार्थिभ्यः संस्कृतकाव्यतत्त्वानां परिबोधाय शिक्षकेण व्यवहारपरां पाठयोजनां निर्माय शिक्षणं विधातव्यम्। दैनिकी साप्ताहिकी षड्मासिकी वार्षिकी च पाठयोजना शिक्षणोपलब्धिप्राप्तये समुपयोगिन्यो भवन्ति।

### विद्यार्थिषु पठनौत्सुक्यप्रवर्धनम्

संस्कृतकाव्यस्य कतिपयविषयान् प्रति कतिपये छात्राः स्वयमेव परिचिता दृश्यन्ते। अतः शिक्षकेण कक्षारम्भे विद्यार्थिनः पूर्वज्ञानस्य व्यावहारिकप्रयोगस्य चाभिव्यक्तये तेभ्यो यथेष्टावसरो देयः। कक्षायां

कविता-कथाश्रावणादिकार्यकलापैर्विद्यार्थिनोऽध्ययनाय समुत्सुकान् विधाय पाठारम्भः करणीयः। शिक्षणक्रमेऽनुभवकथन-प्रश्नोत्तरण-विमर्शनादिमाध्यमेन पाठ्यवस्तु प्रति विद्यार्थिनां मनसः स्थितिः केन्द्रिता करणीया।

**प्रकोष्ठस्य व्यवस्थापनम्**

संस्कृतकाव्यशिक्षणाय प्रकोष्ठस्य वातावरणं शिक्षणमैत्रीपूर्णं निर्मातव्यम्। अस्य कृते शिक्षकस्य विद्यालयस्य च महती भूमिका भवति। कक्षाप्रकोष्ठस्य विद्यालयक्षेत्रस्य च पठनानुकूला भौतिकी सज्जा पाठं प्रति छात्राणां रुचिवर्धने बहूपयोगिनी भवति। अतो काव्यश्लोक-नीतिवाक्य-सूक्ति-पर्यावरणसम्बद्ध चित्रादिसामग्रीभिः कक्षाप्रकोष्ठं विद्यालयभवनञ्चालङ्कर्तव्यम्।

**विद्यार्थिकेन्द्रितस्य शिक्षणविधेः प्रयोगः**

संस्कृतकाव्यशिक्षणक्रमे प्रवचनस्यापेक्षया समूहविमर्शन-प्रश्नोत्तरादिकाच्छात्रकेन्द्रिताः शिक्षणविधयोऽवलम्बनीयाः। कक्षायां शिक्षकः केवलं प्रवाचको न, अपि तु छात्रान्तर्निहितक्षमताप् रस्फोटनाय सहजकर्ता भवेत्। छात्राणां क्रियाशीलतावर्द्धकशिक्षणकार्यकलापाः सञ्चालनीयाः। विद्यार्थिसङ्ख्यानुसारेण समूहेषु छात्रान् विभज्यान्तःक्रिया सञ्चालनीया। वैयक्तिकेन सामूहिकेन वा प्रयत्नेन विषयवस्तु प्रति स्वमतप्रकटनाय वादविवादसाधनाय च छात्रेभ्यः पर्याप्तावसरः प्रदातव्यः।

**शिक्षणसामग्रीणां वैविध्येन प्रयोगः**

काव्यशिक्षणक्रमे विषयसम्बद्धशिक्षणसामग्रीणां प्रयोगो वैविध्येन करणीयः। न केवलं पाठ्यपुस्तक-श्वेतपट्ट- शब्दपत्रिकादीनामेव, अपि तु श्रव्यदृश्यादीनामाधुनिकीनां शिक्षणसामग्रीणामपि सान्दर्भिकं प्रयोगं विधाय काव्यविषयानुशीलने छात्राणां साहाय्यं विधेयम्।

**अभिप्रेरणं पृष्ठपोषणञ्च**

पाठस्य मनन-चिन्तन-प्रश्नोत्तरलेखनादिषु पठितानां काव्यविषयाणां च शिक्षकेण नैरन्तर्येण छात्राणां प्रेरणं विधेयम्। विद्यार्थिभिरधीतानां विषयाणामनुसरणं दैनन्दिनव्यवहारे कृतं न वेति सूक्ष्मतयावलोक्य शिक्षकेण यथोचितं पृष्ठपोषणं कर्तव्यम्। काव्यस्य श्लोकवाचनक्रमेऽर्थबोधे च शिक्षणमाध्यमेन समस्या निराकर्तव्या।

**प्रेरकसन्दर्भेषु योजनम्**

संस्कृतकाव्य-काव्यशास्त्रसम्बद्धविषयेषु साहित्यसर्जकानां प्रवचनोपदेशश्रवणेऽपि छात्रेभ्यो यथोचितोऽवसरः प्रदातव्यः। अन्तर्जालसङ्गणकादिप्रविधीनां सहयोगेन काव्यविषयकप्रवचन-हितोपदेश-सिद्धपुरुषजीवनचरितादि-श्रव्यदृश्यशिक्षणसामग्रीः प्रदर्श्यापि काव्यसम्बद्धज्ञानविकासाय छात्राणामभिप्रेरणं विधातव्यम्।

**अभ्यासात्मकाः कार्यकलापाः**

संस्कृतकाव्यशिक्षणक्रमे अभ्यासप्रधानानां कार्यकलापानां सञ्चालनमपरिहार्यत्वेन स्वीकरणीयम्

अनेकविधप्रयोगात्मककार्यकलापेषु छात्रान् संलग्नान् कारयित्वा पठितविषयाणां परीक्षणं विधातव्यम्। संस्कृतकाव्यानां श्लोकांश्च सङ्कलय्य तेषामर्थबोधे परीक्षणाय छात्रा उत्प्रेरणीयाः।

## संस्कृतकाव्यशिक्षणस्य सिद्धान्ताः

संस्कृतकाव्यशिक्षणे संलक्षितानां शिक्षणसिद्धान्तानां सङ्क्षेपेणाधः परिचयः प्रस्तूयते।

**अभ्यासस्य सिद्धान्तः**

काव्यशिक्षणेऽभ्यासस्यातीव महत्त्वं विद्यते। रघुवंशादिमहाकाव्यानां दशकुमारचरितादीनां गद्यकाव्यानामभिज्ञानशाकुन्तलप्रभृतीनां नाटकानां च शिक्षणे विद्यार्थिष्वभ्यासस्यावश्यकताऽनुभूयते। अभ्यासेन पुनरावृत्त्या विद्यार्थिनः सम्यग्रूपेण संस्कृतभाषासु लिखितानि श्लोकादीनि वाचयितुं शक्नुवन्ति, व्याख्यां विश्लेषणं विधातुं च शक्नुवन्ति।

**अभिरुचिसिद्धान्तः**

विद्यार्थिनामभिरुच्यनुसारेण काव्यशिक्षणं विधातव्यम्। न केवलं शिक्षकस्याकाङ्क्षानुकूलमपि तु विद्यार्थिनां रुच्यनुकूलानां विषयवस्तूनां शैक्षिकसामग्रीणां प्रयोगेण शिक्षणं कर्तव्यम्। शिक्षणविधौ शैक्षिकसामग्रीप्रयोगे च वैविध्यमपेक्ष्यते। प्रासङ्गिकानामुदाहरणानां प्रयोगेन विद्यार्थिनां कृते पुरस्कारस्य व्यवस्थापि कर्तव्या। एतादृशैर्विविधैः कारणैर्विद्यार्थिषु ज्ञानार्जने रुचिरुदेति।

**स्वाभाविकतायाः सिद्धान्तः**

काव्यशिक्षणे स्वाभाविकतामपेक्ष्यते। विद्यार्थिनां पूर्वभाषिकी पृष्ठभूमिः पूर्वज्ञानं च विचार्य पाठनीयम्। विद्यार्थिनां सामाजिकीमार्थिकीं पारिवारिकीं शैक्षिकीञ्चावस्थां विज्ञायैव विद्यार्थिभ्यः शिक्षा प्रदेया। विद्यार्थिनामनुभवरहितानां विषयाणां शिक्षणेन तेऽनभिज्ञा जायन्ते। पाठ्यक्रमे निर्धारितानि विषयवस्तुनि विद्यार्थिनामनुभवसम्बद्धानि विधाय स्वाभाविकरूपेण पाठनीयानि भवन्ति।

**वैयक्तिकभिन्नतायाः सिद्धान्तः**

शिक्षार्थिषु विभिन्ना वैयक्तिका गुणाः प्राप्यन्ते। एतेषां बुद्धिः क्षमता प्रवृत्तिश्च पृथक् पृथक् संलक्ष्यते। विद्यार्थिनां पारिवारिकी सांस्कृतिकी च पृष्ठभूमिर्भिन्नैव भवति। कक्षायां कतिपये विद्यार्थिनः प्रतिभाशालिनो भवन्ति, कतिपये मन्दबुद्धियुताश्च दृश्यन्ते। तेभ्यो भिन्नवैशिष्ट्ययुतेभ्यो विद्यार्थिभ्य एकस्मिन्नेव समूहे व्यवस्थाप्य पाठनं समीचीनं न जायते। अतो विद्यार्थिनां वैयक्तिकभिन्नतामवज्ञाय समूहविभाजनं कृत्वा शिक्षणमुचितं भवति।

**सक्रियतायाः सिद्धान्तः**

कक्षायां शिक्षणं प्रभावान्वितं विधातुं विद्यार्थिनां सक्रियताया आवश्यकता जायते। यदि विद्यार्थिनः सक्रिया न भवेयुस्तर्हि शिक्षणे साफल्यं न प्राप्यते। तत्र पठने लेखने भाषणे च विद्यार्थिसक्रियताऽपेक्षते। शिक्षकेन विहितमधिकं व्याख्यानं समुचितं न मन्यते। कक्षायां सर्वदैव विद्यार्थिकेन्द्रितः शिक्षणविधिरवलम्बनीयो भवति।

**शिक्षणविधौ विविधतायाः सिद्धान्तः**

कक्षायां सर्वदैकस्यैव शिक्षणविधेः प्रयोगो विद्यार्थिनां कृते आलस्यप्रदो भवति। पाठ्यक्रमस्योद्देश्यपरिपूर्तये पाठ्यविषयस्य सन्दर्भानुसारेण विविधानां शिक्षणविधीनां प्रयोगो विद्यार्थिनां रुचिप्रदायको जायते। शिक्षणे विषयवस्तूनां प्रकृत्यनुसारेण व्याख्यान-खेल-विमर्श-प्रश्नोत्तर-समस्यासमाधानाभिनयादीनां विविधविधीनां प्रयोगो विधेयः।

**पूरकसामग्रीप्रयोगस्य सिद्धान्तः**

संस्कृतकाव्यानां शिक्षणे पाठ्यपुस्तकातिरिक्तानां पूरकसामग्रीणां प्रयोग आवश्यको दरीदृश्यते। तत् राभ्यासपुस्तिकापत्रिकाचित्रादीनां पूरकसामग्रीणां सान्दर्भिकः प्रयोगोऽपेक्ष्यते। विविधानां साहित्यिकीनां रचनानां प्रयोगोऽपि पाठ्यवस्तूनां परिपोषणे उपयोगी जायते। एवमेव संस्कृतकाव्यशिक्षणे दूरदर्शनयन्त्र-दूरभाषयन्त्र-प्रक्षेपक सुसाङ्ख्यप्रभृतीनां श्रव्यदृश्यसामग्रीणां समुचितः प्रयोगो विधेयः।

## संस्कृतकाव्यशिक्षणविधयः

संस्कृतकाव्यशिक्षणायाऽधस्तनाः शिक्षणपद्धतयोऽवलम्बनीयाः -

**(क) व्याख्यानविधिः**

अत्र विधौ छात्राणां पुरतो यथाप्रकरणान्तर्गतं पाठ्यं विषयं प्रस्तुत्य सम्यग् विवरणं देयम्। व्याख्यामुखेन संस्कृतकाव्यसम्बद्धः पाठ्यविषयः सम्यक् स्फुटीकर्तव्यः।

**(ख) प्रश्नोत्तरविधिः**

अत्र विधौ पूर्वं व्याख्याते विवृते च विषये छात्राणां कियान् बोधो जातः ? इति ज्ञानार्थं पाठितविषये छात्राः प्रष्टव्याः। अज्ञातेऽस्पष्टे च पुनर्व्याख्या विधेया।

**(ग) प्रदर्शनविधिः (प्रयोगविधिः)**

श्लोकानां व्याख्यानपद्धतिं विद्यार्थिनां पुरतः श्यामपट्टादिषु विलिख्य व्याख्याय च तेषां समन्वयप्रकारं प्रदर्श्य छात्राः प्रष्टव्याः, बोधस्थितिं विचार्य पुनर्व्याख्या च विधेया।

**(घ) अवेक्षणविधिः**

विद्यार्थिनः कथं श्लोकोच्चारणं कुर्वन्तः सन्ति, ते संस्कृतकाव्याध्ययनाद् रसानुभूतिर्गृह्णन्तः सन्ति न वेति शिक्षकेण सम्यगवेक्षणीयं भवति। अयं विधिर्विशेषतो विद्यार्थिकेन्द्रितः।

**(ङ) अन्तःक्रियात्मकविधिः**

पाठितस्यांशस्य छात्राणां बोधः कियान् कीदृशश्च जातः ? इति ज्ञानार्थं छात्रैः सह शिक्षकस्य परस्परं छात्राणाञ्चान्तःक्रिया कार्या। अज्ञातेंऽशे च पुनर्व्याख्या विधेया।

**(च) आगमनविधिः**

प्रथमतः कस्यापि विषयस्य नियमं लक्षणं वानुक्त्वा तद्विषयकं विवरणं लक्ष्यस्थलं वोपस्थापनीयम्। तत

एव व्याख्यातस्य विषयस्य नियमो लक्षणं वा वाच्यम्। विद्यार्थिनां बोधाभावे ते पुनर्बोधनीयाश्च।

**(छ) निगमनविधिः**

अत्र विधावागमनविधिविपरीततया व्याख्येयस्य विषयस्य नियमं लक्षणं वा विविच्योदाहरणं लक्ष्यस्थलं वोपस्थापनीयम्। ततः कथञ्च लक्षणस्य लक्ष्ये समन्वयो भवतीति च सम्यग् विवेच्यम्।

उक्तान् शिक्षणविधीन् प्रयुज्य सहजाध्यापनस्य कृते शिक्षकैरधस्तनाः केचन विषया विशेषतोऽवधेयाः -

(अ) शिक्षकेण वार्षिकीं मासिकीं पाक्षिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनाम् एवमेव पाठ्यांशशिक्षणयोजनां दैनिकपाठयोजनां च निर्माय, तदनुसारेण शिक्षणकार्यं सम्पादनीयम्।

(आ) पाठ्यविषयेषु छात्राणां यथा रुचिः प्रवृत्तिश्च सम्पद्येत तदनुरूपं शिक्षणं सम्पादनीयम्। पाठ्यमानस्य पूर्वं पाठितस्य च विषयस्य सम्बन्धं बोधयित्वैव पाठ्यकार्यमारभणीयम्।

मूलतः संस्कृतकाव्यशिक्षणेऽधोलिखितानाम् अभ्यासप्रधानानां सर्जनात्मकानाञ्च क्रियाकलापानां सम्पादनमावश्यकं भवति -

- प्रस्तुतीकरणम्
- अभ्यासः
- उत्पादनम्
- पठनबोधः
- प्रयोगात्मककार्यम्
- पृष्ठपोषणम्

प्रथमं शिक्षकेण विषयवस्तुनः प्रस्तुतीकरणं विधातव्यम्। तदनु विद्यार्थिनां कृतेऽभ्यासमूलकः कार्यकलापः करणीयः। अभ्यासानन्तरं विद्यार्थिसमूहे कविता-कथालेखनादिरुत्पादनात्मकः कार्यकलापो विधातव्यः। तदनु साहित्यिकस्य पाठस्य पठनबोधस्याभ्यासः कर्तव्यः। ततो विद्यार्थिषु प्रयोगात्मकं कार्यं करणीयम्। पश्चात् शिक्षकेण पृष्ठपोषणं प्रदातव्यम्। शिक्षणकार्यकलापस्यान्ते विद्यार्थिनां मूल्याङ्कनं विधातव्यम्। अनेन क्रमेण काव्यशिक्षणे विहिते शिक्षणं प्रभावान्वितं जायते।

**काव्यशिक्षणाय पाठयोजनायाः परिचयः**

कस्यामपि कक्षायां प्रविश्य विद्यार्थिनः पाठयितुं शिक्षकस्य कृते पाठयोजनाऽऽवश्यकी भवति। योजनां विना विहितं शिक्षणं निष्फलं जायते। निर्धारितं पाठं निश्चिते समय एव पूर्णं विधातुं पाठयोजनाया आवश्यकता भवति। पाठ्यक्रमस्योद्देश्यं विचार्य पाठयोजना निर्मीयते। एतादृशी योजना शिक्षणकार्यक्रमं सुव्यवस्थितं प्रभावकारिणं च विदधाति। विद्यार्थिनां स्तरानुकूलं क्षमतानुकूलं च शिक्षितुं पाठयोजनाऽत्यावश्यकी वर्तते। पाठयोजनानिर्माणक्रमे कर्गजपत्रस्य शीर्षभागे कक्षा, विषयः, पाठनाम, पाठ्यवस्तु, विद्यार्थिसङ्ख्या,

दिनाङ्कः, पाठ्यसमयश्च निर्धार्यते। मूलतः पाठयोजनायामधो निर्दिष्टा अवयवा विद्यन्ते -

**उद्देश्यम्**

उद्देश्यं पाठ्यवस्तुशिक्षणस्याभिप्रायं ज्ञापयति। पाठयोजनायां मापनीयं विशिष्टमुद्देश्यं निर्धार्यते। पाठ्यक्रमस्योद्देश्यानुसारेण पाठ्यवस्तूनां प्रकृत्यनुकूलं च निर्धारिते समये शिक्षणकार्यं पूर्णं विधातुं निश्चितमुद्देश्यं समाविश्यते। शार्दूलविक्रीडितच्छन्दसः परिचयपूर्वकं गतियतिलयानुसारेणास्य छन्दसः कवितावाचने विद्यार्थिनः सक्षमा भविष्यन्तीत्यादिना प्रकारेणोद्देश्यनिर्धारणं विधीयते।

**शिक्षणसामग्री**

निर्धारितोद्देश्यानुकूलं विद्यार्थिषु साफल्यं प्रापयितुं शिक्षणसामग्री अत्यावश्यकी। केवलं शिक्षकस्य व्याख्यानेनैव विद्यार्थिनो विषयवस्तूनि सम्यग् रूपेणावगन्तुं न पारयन्ति। विविधानां श्रव्यदृश्यादिशैक्षिकसाम ग्रीमाध्यमेन विहितं शिक्षणमेव प्रभावान्वितं जायते। छन्दः शिक्षणे विस्तारिते कर्गजपत्रे स्थूलाक्षरैः कवितायाः श्लोकं विलिख्य विद्यार्थिसमक्षं कक्षाया भित्तिकायां प्रदर्श्य गतियत्यादीनां विषयः सम्यक् प्रकाशयितुं शक्यते। तथैव ध्वनिसङ्ग्रहण (रेकर्डर) माध्यनेन केनापि जनेन गीतं कवितायाः पद्यमादर्शवाचनरूपेण प्रस्तोतुमुचितं जायते। एभिः कारणैर्विद्यार्थिनो छन्दोज्ञाने निपुणाः सम्भवन्ति।

**विषयोपस्थापनम् /कार्यकलापाः**

पाठयोजनासु प्रतिदिनं पाठ्यमानस्य विषयस्य क्रमबद्धा प्रस्तुतिः प्राप्यते। शिक्षकः कक्षायां प्रविश्य प्रथमं किं करोति, तदनु किं करोति, कक्षायाः समाप्तिश्च कथं जायत इत्यादीनां प्रश्नानामुत्तरमस्मिन् प्रकरणे प्राप्यते। तत्र प्रथमं शिक्षकेण कक्षायां प्रविश्य विद्यार्थिनां पूर्वज्ञानपरीक्षणं कर्तव्यम्। गतदिवसस्य कक्षायां पाठितः पाठः प्रष्टव्यः, शिक्षकेण विविधप्रश्नमाध्यमेन पूर्वपाठस्य स्मरणं कारयितव्यम्। तदनु पाठ्यमानस्य पाठस्योद्देश्यकथनपूर्वकं विषयोपस्थापनं विधीयते। तत्र कक्षायामादर्शवाचनम्, अनुवाचनम्, अशुद्धिसंशोधनम्, काठिन्यनिवारणञ्चेत्यादिक्रियाकलापा विधातव्याः। शिक्षणक्रमेऽस्मिन् शिक्षकनिर्मिताः शिक्षकसङ्कलिता वा शिक्षणसामग्र्यः प्रदर्शनीयाः। तदनु पाठस्योद्देश्याकूलतया निर्मितानां शिक्षणसामग्रीणां विषये विवेचनं विधातव्यम्। तत्र संवाद-प्रश्नोत्तर-घटनावर्णन-भाषणाभिनय-द्रुतपठन- सस्वरवाचन-मौनवाचनादिभिर्विधिभिः प्रभावकारिणं शिक्षणं कर्तव्यम्।

**मूल्याङ्कनम्**

कक्षाशिक्षणमाध्यमेनोद्देश्यानि पूर्णानि न वेतिविचारयितुं विद्यार्थिनां मूल्याङ्कनं विधीयते। तत्र प्रश्नोत्तर पर्यवेक्षणनिरीक्षणप्रयोगमाध्यमेन मूल्याङ्कनं क्रियते। शिक्षकः कक्षायां सम्यग्रूपेण पाठयति, परं विद्यार्थिना पाठा ज्ञाता न वा, विषयवस्तूनि स्मृतानि न वेत्यवगन्तुं मूल्याङ्कनस्यावश्यकता भवति। तत्र शिक्षकेण विद्यार्थिसमूह एव सामूहिकः प्रश्नः प्रष्टव्यः, तदनु प्रत्येकं विद्यार्थिनां पृथक् पृथग्रूपेणोत्तराऽपेक्षणीया भवन्ति। अत्र शिक्षकेण सारकथन-विचारविश्लेषणसम्बद्धाः प्रश्नाः पृच्छ्यन्ते। विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति। विद्यार्थिनां शिक्षणोपलब्धिसुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षास

दृशान् क्रियाकलापान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयोरवाप्तिरावश्यकी। एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्याभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम्। पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन् न वेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति। विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम्।

### गृहकार्यम्

विद्यार्थिनः शिक्षणक्रियाकलापं सबलीकर्तुं गृहेऽपि सक्रियतया पठनकार्योन्मुखं तत्परं च विधातुं गृहकार्यस्योल्लेख्या भूमिका वर्तते। विद्यालयस्य कक्षायां पठितविषयसम्बद्धानां प्रश्नानामुत्तरं लिखितुं पाठं पठितुं च विद्यार्थिनो गृहकार्यं विधातुं निर्दिश्यन्ते। गृहकार्येण विद्यार्थिनो गृहेऽपि पठन्ति, लिखन्ति च। गृहकार्यस्य माध्यमेन विद्यार्थिनः पाठ्यक्रमातिरिक्तेषु विषयेष्वपि रुचिं प्रदर्शयन्ति। विद्यार्थिषु रचनात्मकं व्यक्तित्वं निर्मातुं गृहकार्यमपरिहार्यमस्ति।

### प्राचीनाधुनिकयोः शिक्षणविध्योः पार्थक्यम्

प्राचीनकाले संस्कृतकाव्यशिक्षणे परम्परागतानां शिक्षणविधीनां प्रयोगो जायमान आसीत्, अधुना विविधानां श्रव्यदृश्यसामग्रीणां विकासात् संस्कृतकाव्यशिक्षणेऽप्याधुनिकविधीनां प्रयोगो दृश्यते। अनयोः शिक्षणविधेः पार्थक्यं बिन्दुरूपेणाधो प्रस्तूयते -

| क्र. सं. | प्राचीनशिक्षणविधिः | आधुनिकशिक्षणविधिः |
|---|---|---|
| १ | शिष्यान् गुरुकुले सन्निवेश्य तेभ्यः शिक्षा दीयते स्म। | छात्रान् विद्यालये महाविद्यालये च सन्निवेश्य तेभ्यः शिक्षा दीयते। |
| २ | गुरुः शिक्षणस्य मुख्यः केन्द्र आसीत्। | संस्कृतशिक्षणे छात्रः केन्द्रत्वेन स्थाप्यते। |
| ३ | मौखिकपद्धत्या (श्रवण-कथन-स्मरणैः) अध्ययनं भवति स्म। | लेख्य-दृश्य-श्रव्यसाधनैरध्ययनाध्यापनं जायते। |
| ४ | कण्ठस्थीकरणे विशेषः समयो दत्त आसीत्। | बोध-विश्लेषण-प्रयोगेषु समयो दीयते। |
| ५ | सीमिता ग्रन्थाः परम्परागतज्ञानञ्चासीत्। | विविधानिपुस्तकानि,प्रविधयः,अनुसन्धानञ्चास्ति। |
| ६ | अनुशासनशिक्षाऽऽचारशिक्षा च पाठ्यक्रमे प्राधान्येन संयोजिता आसन् । | विषयज्ञाने कौशलविकासे प्रविधिप्रयोगे चाधिकं महत्त्वं प्रदीयते। |

### काव्यशिक्षणे विचारणीयाः प्रमुखाः पक्षाः

संस्कृतकाव्यशिक्षणे विद्यार्थिनां रुचिवर्धनार्थं काव्यं सारल्येन बोधयितुञ्च विविधाः पक्षा विचारणीयाः। एते विचारणीयाः सन्दर्भा निम्नाङ्किताः सन्ति -

- प्रथमं शिक्षकेण पूर्वपाठस्य चर्चा विधातव्या।

- तदनु पाठ्यविषयस्य लेखकस्य च परिचयो देयः।
- शिक्षकेण कवितायाः काव्यस्य वाऽऽदर्शवाचनं कर्तव्यम्, तदनु छात्राणामनुकरणवाचनं कारयितव्यम्।
- काव्ये प्रयुक्तानां कठिनपदानामर्थाः पर्यायेन व्युत्पत्त्या व्याख्यया वा बोधनीयाः।
- पद्यानां गद्यभाषायां क्रमबद्धशब्दविन्यासेनान्वयेन वार्थबोधः करणीयः।
- संस्कृतकाव्यस्य मुख्यभाव-सन्देश-प्रसङ्गाश्च स्पष्टतया व्याख्येयाः।
- पाठ्यविषयं सारल्येन बोधयितुं श्रव्यदृश्यसामग्रीणां प्रयोगो विधेयः।
- एवञ्च काव्यस्य प्रकृत्यानुसारेणागमन-निगमन-व्याख्या-विमर्शादीनां शिक्षणविधीनां प्रयोगः करणीयः।
- काव्ये विद्यमानानां छन्दोऽअलङ्कार-रस-ध्वनि-गुण-रीत्यादीनां परिचयो देयः।
- सम्बद्धकाव्यविषये विद्यार्थिभिः सह प्रश्नोत्तरकार्यकलापाः सञ्चालनीयाः ।
- सुन्दरपद्यानां कण्ठस्थीकरणेन विद्यार्थिषु उच्चारणकौशलं स्मरणशक्तिश्च वर्धनीया।
- विद्यार्थिषु काव्यस्यार्थ-सन्देश-सौन्दर्यादिविषयेषु च परिचर्चा विधातव्या।
- विद्यार्थिनो लघुपद्यलेखने भावार्थलेखने च प्रेरणीयाः।

एतेषां कार्यकलापानां माध्यमेन संस्कृतकाव्यस्य शिक्षणं रुचिकरं प्रभावान्वितं च जायते। एवञ्च विद्यार्थिषु भाषाज्ञानं साहित्यबोधः काव्यविश्लेषणकला च वर्धते।

## निष्कर्षः

संस्कृतकाव्यशिक्षणे विविधाः सिद्धान्ताः प्रचलिता दृश्यन्ते। तत्र काव्यशिक्षणे योजनाबद्धस्य शिक्षणस्यापि आवश्यकता जायते। योजनया विना विहितं शिक्षणमुद्देश्यपूरकं न जायते। एवञ्च कक्षायां पाठितानां विषयाणामाधारेण विद्यार्थिमूल्याङ्कनमप्यावश्यकं भवति। विद्यार्थिनः शिक्षिता न वेत्यवगन्तुं मूल्याङ्कनं विधेयम्। एवमेव कक्षायां शिक्षकेण प्रयुक्ता संस्कृतभाषापि स्तरीयौपचारिकी चापेक्ष्यते, अशुद्धसंस्कृतभाषाप्रयोगेणान्यभाषाप्रयोगेण वा विहितं शिक्षणमुद्देश्यपूरकं न जायते। अतः संस्कृतकाव्यशिक्षणसन्दर्भे विविधानां सिद्धान्तानां समुचितः प्रयोगो विधेयः। शिक्षणक्रमे पाठयोजना विधातव्या। पाठयोजनयैव काव्यशिक्षणं रुचिपूर्णं प्रभावान्वितं च जायते। संस्कृतकाव्यशिक्षणस्य कृते आधुनिकविधयोऽप्युपयोगिनो दृश्यन्ते। विद्यालयैर्विश्वविद्यालयैश्च निर्धारितपाठ्यक्रमे शिक्षणपद्धतिः प्रक्रिया च स्पष्टतया उल्लिखिता भवेत्। पाठ्यक्रमेण पृथक् शिक्षणपद्धतिभिः प्रक्रियाभिश्च पाठयितुं निर्देशः करणीयः। संस्कृतकाव्यशिक्षणाय प्रारम्भिककक्षायामध्यापनकाले प्रदर्शनविधिं प्रयोक्तुं शक्यते। अनया पद्धत्या सामग्रीं प्रस्तूय प्रश्नोत्तरविधिना विषयं व्याख्यातुं शक्यते। व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्याः शिक्षणविधयः प्रतिपाद्यविषयानुरूपं संस्कृतकाव्यशिक्षणं कर्तुं शक्यन्ते। तत्रापि संस्कृतकाव्यशिक्षणे आगमनविधेः प्रयोगः प्रभावान्वितो जायते। यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव ज्ञानार्जनाय छात्राः समुत्प्रेरणीयाः। संस्कृतकाव्यशिक्षणक्रमे प्रथमं शिक्षकेण

पूर्वपाठस्य चर्चा विधातव्या। तदनु पाठ्यविषयस्य लेखकस्य च परिचयो देयः। शिक्षकेण कवितायाः काव्यस्य वाऽऽदर्शवाचनं कर्तव्यम्, तदनु छात्राणामनुकरणवाचनं कारयितव्यम्। ततः काव्ये प्रयुक्तानां कठिनपदानामर्थाः पर्यायेन व्युत्पत्त्या व्याख्यया वा बोधनीयाः। संस्कृतकाव्यस्य मुख्यभाव-सन्देश-प्रसङ्गाश्च स्पष्टतया व्याख्येयाः। एवञ्च समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगेण सङ्गणकयन्त्रस्य सहयोगेनान्तर्जालादिमाध्यमेन च संस्कृतकाव्यानि प्रभावान्वितेनाध्यापयितुं शक्यते।

## सन्दर्भसूची


अधिकारी, हेमाङ्गराज. (२०५३). *नेपालीभाषा शिक्षण.* काठमाडौँ : कुञ्जल प्रकाशन।

आचार्य, रामचन्द्रमिश्रः. (२०१०). *संस्कृतसाहित्येतिहासः.* वाराणसी : चौखम्बाविद्याभवन।

आप्टे, वामनशिवरामः. (सन् १९८७). *संस्कृत-हिन्दीकोशः.* वाराणसी : मोतीलालवनारसी दास।

ढुंगेल, भोजराज एवम् दाहाल, दुर्गाप्रसाद. (२०६९). *नेपालीभाषा पाठ्यक्रम पाठ्यपुस्तक तथा शिक्षण पद्धति.* काठमाडौँ : एम्. के. पब्लिसर्स एण्ड डिस्टिब्युटर्स।

नेपाल सरकार. (२०७६). *माध्यमिक शिक्षा पाठ्यक्रम कक्षा ११ र १२.* सानो ठिमी : पाठ्यक्रम विकास केन्द्र।

नेपालसंस्कृतविश्वविद्यालयः. (२०८१). *साहित्यविषयस्य तृतीयखण्डस्य पाठ्यक्रमः.* शास्त्रिकक्षायाः पाठ्यक्रमः

मम्मटः. (सन् १९९४). *काव्यप्रकाशः.* द्वि.सं.. वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।

मिश्र, कालीशङ्कर. (सन् २०१७). *संस्कृत का शिक्षणशास्त्र* (भाग-१). शिक्षक शिक्षा विभाग. उत्तराखण्ड मुक्त विश्वविद्यालय।

रञ्जनाकुमारी. (सन् २०१७). *Teaching of Sanskrit*. Himachal Pradesh University.

विश्वनाथः. (सन् १९९५). *साहित्यदर्पणः.* (व्याख्याता शेषराजशर्मा रेग्मी) पं. सं., कृष्णदास अकादमी।